| | |
|---|---|
| उद्बोधकः | स्वामी आत्मरूपानन्दः |
| मार्गनिर्देशकः | विद्वान् वेङ्कटरमणभट्टः, प्राध्यापकः संस्कृतविभागस्य। |
| आलङ्कारिकः | तथागतः मण्डलः, स्नातकोत्तरप्रथमवर्षीयः। |
| सम्पादकः | सुप्रियः गोस्वामी, स्नातकोत्तरप्रथमवर्षीयः। |
| वर्षम् | २ |
| अङ्कः | ६ (रवीन्द्रनाथठाकुरः) |
| प्रकाशनदिनाङ्कः | 04/04/2016 |

| | | |
|---|---|---|
| सम्पादकीयम् | | 3 |
| रवीन्द्रनाथस्य कथावर्णनपाटवम् | दीपज्योतिलायेकः | 4 |
| रवीन्द्रनाथस्य कृषिभावना | अनन्त-मुखार्जी | 6 |
| तस्करकथा | सौमित्र-आचार्यः | 8 |
| रवीन्द्रनाथस्य देशप्रेम | तुहिनमण्डलः | 11 |
| तथ्यमञ्जूषा | मलय-माइतिः | 13 |

# सम्पादकीयम्

वङ्गवाङ्मयनभसि स्वभासा रविरिव भासते कविगुरुः रवीन्द्रनाथठाकुरः। कवित्वप्रतिभया वङ्गसाहित्ये कालिदाससमत्वं भजते अयं महाकविः। काव्यं नाटकं चित्राङ्कनं सङ्गीतम् इत्येतासां विविधप्रतिभानामाकरभूत आसीत् विश्वकविः। तद्गुणैः कर्णमागत्य चापलाय प्रचोदिता वयं तदीयप्रतिभारजोलेशं प्रसारयितुं किञ्चित् प्रचेष्टितवन्तः। तस्य आविर्भावदिवसमुपलक्ष्य अङ्कोऽयं तदीयचरणयोः समर्प्यते सश्रद्धमिति-

सम्पादकस्य

# ॥रवीन्द्रनाथस्य कथावर्णनपाटवम्॥

दीपज्योतिः लायेकः, स्नातकप्रथमवर्षीयः

आनवत्युत्तराष्टादशतमेशवीयाब्दतः एकोनचत्वारिंशदधिकेशवीयाब्दपर्यन्तम् इमानि पञ्चाशद्वर्षाणि व्याप्य लघ्व्य आख्यायिका व्यरचयद् रवीन्द्रनाथः। एतासु वङ्गप्रदेशस्थानां जनानां वैचित्र्यमण्डितजीवनं कविप्रतिभया ग्रन्थाध्येतृणां सहृदयानां चक्षुषोऽग्रतो प्राणान् प्राप्य नरीनृत्यते इव। पल्लीमनु ग्रामेषु कलिकातादिनगरीषु च निवसतां धनिनां निर्धनानाम् उदाराणां कठोराणां सर्वेषां जनानां जीवनं स्फुटं भाति। रवीन्द्रसाहित्यं ऊनविंशशताब्द्या वङ्गसमाजस्य दर्पणायते इत्यत्र नास्ति कस्यापि विप्रतिपत्तिः। यथा मध्यवर्तिनी इति कथायां म्याक्मोरान्-संस्थाप्रधानस्य निवारणस्य वर्षशतपूर्वकस्य जीवनं वर्णयन्नाह कविः

"प्रातरुत्थाय अनावृतदेहो निवारणो धैर्येण प्रसादेन च ताम्बूलं भुञ्जानो गृहद्वारे उपविष्टः। पथि जना वाहना गच्छन्ति आगच्छन्ति च, वैष्णवभिक्षुको गीतं गायति, भग्नवस्तुसंग्राहका उच्चैः चित्कुर्वन्तो गच्छन्ति-एतत्सर्वं तस्य मन ईषत्समाच्छन्नं करोति। यस्मिन् दिवसे च आम्रफलविक्रेता मत्स्यविक्रेता वागच्छति तस्मिन् दिवसे रन्धनाय विशेषव्यञ्जनं व्यवस्थाप्यते। ततः तैलं मर्दयन् स्नात्वा भोजनं समाप्य कार्यालयं गच्छति। सायं कार्यालयात् प्रत्यागम्य प्रतिवेशिनो रामलोचनघोषस्य गृहे जल्पन् रात्रौ निशाशात् परं शयनप्रकोष्ठे पत्न्या हरसुन्दर्य्याः साक्षात्कारं प्राप्नोति।"

वर्षशतपूर्वकस्य मध्यवित्तवङ्गीयस्य प्रात्यहिकजीवनं चित्रवदत्र स्फुटं दृश्यते। वर्णनमेतत् अतिसाधारणं तथाप्यत्र विद्यते माधुर्यविशेषः। निवारणचरितमत्र कौतुककरं भाति। न हि कवेः जीवनमेतादृशमासीत् तथापि स्वाननुभूतस्यापि विषयस्य एतादृशं वर्णनं कवेः माहात्म्यमेव ख्यापयति।

एवमेव समाप्ति इति कथायामपि न केवलं मृन्मय्या अपूर्वकृष्णस्य ईशानस्य वा चरितवर्णने अपि तु तत्तच्चरितवर्णनानुकूलप्रकृतिवर्णनेऽपि कवेः प्रतिभा दरीदृश्यते। अपूर्वकृष्णमृन्मय्योर्विवाहे अवकाशाभावादागन्तुमक्षमस्य मृन्मय्याः पितुरीशानस्य

मनोव्यथा कस्य सहृदयपाठकस्य हृदयं न व्यथयति। तयोः विवाहान्ते दर्शनार्थिनः सभार्यस्य जामातुः अपूर्वकृष्णस्य श्वशुरेण ईशानेन साक्षात्कारवर्णनं कस्य सन्मनसो मनो न हरति।

. किञ्च शास्तिनामके आख्याने भात्रोः दुःखिरामछिदामयोः दारिद्र्यमन्ते च अनुजस्य छिदामस्य पत्न्याश्चन्दरायाः दोषरहिताया अपि कारागारगमनं कस्य सहृयपाठकस्य हृदये हाहाकारं न सृजति।

अलमति विस्तरेण एतासां कथानामनुवादे रसभङ्गोऽनिवार्यः अतो वङ्गीयैः काव्यपीयूषपिपासुभिः रवीन्द्रनाथस्य कथा अवश्यं पठनीया इति विरम्यते।

# ॥रवीन्द्रनाथस्य कृषिभावना॥

अनन्तमुखार्जी, स्नातकोत्तरद्वितीयवर्षीयः।

रवीन्द्रनाथः अस्माकं समीपे शिल्पसंस्कृतेः वटवृक्षस्वरूपः। रवीन्द्रनाथः श्रीनिकेतने १९२२ क्रिस्ताब्दे तस्य बहुदिवसव्यापिनः स्वप्नभावनापल्लीपुनर्घटनकर्मकाण्डस्य प्रातिष्ठानिकरूपं प्रदत्तवान्। तस्मिन् वर्षे फरवरीमासस्य षष्ठदिनाङ्के श्रीनिकेतनस्थे भवने स तस्य Rural Re- construction इत्यस्याः परिकल्पनायाः कार्यमारब्धवान्। शान्तिनिकेतनं तथा श्रीनिकेतनमिति उभयमेव आसीत् रवीन्द्रनाथस्य सर्वकालीना चिन्ता। एकत्र शिक्षायां मनसः मुक्तेः अनुसन्धानम्, किञ्च अपरत्र क्षुधा तथा दारिद्र्यतः उपेक्षितानां पल्लीवासिनामुद्धाराय मार्गानुसन्धानम्, न केवलं चिन्तया अपि तु प्रायोगिकरूपेण। श्रीनिकेतने क्षेत्रस्य आयतनमासीत् षष्ठीविघापरिमितम्। क्षेत्रसेचनार्थं मध्ये कश्चित् तडाग आसीत्। न केवलं शश्यानाम् उत्पादने अपि तु शाकानां किञ्च फलानामुत्पादनेऽपि तस्य महदवदानमासीत्। पशुपालने एवञ्च हंसकुक्कुट्यादीनां परिपालनेऽपि आसीत् तस्य महद् ध्यानम्। क्षेत्रस्य उर्वरता अपि समीचीना अस्ति वा इति विषये सः पर्यवेक्षणं करोति स्म। सारस्य तथा बीजानां सुष्ठु व्यवहारः तथा उपयुक्तं सेचनं कृषिकार्यस्य उत्पादिका शक्तिः तथा उत्पादनवृद्धेः कौशलम् इत्यासीत् ग्रामस्थानां कृषकानां शिक्षणस्य विषयः। स आदर्शं क्षेत्रं निर्माय पार्श्वस्थग्रामतः कृषकान् आहूय तत् क्षेत्रं प्रदर्शयन् तेऽपि यथा तादृशं क्षेत्रं निर्मेयुः इति शिक्षां प्रदत्तवान्। रवीन्द्रनाथः एतत् सर्वं कार्यं परिचालयितुं कृष्यर्थनीतिविदं ब्रिटिशयुवकं लिओनार्दो एल्महोर्स्टमहोदयं नियुक्तवान्। कृषेः तथा पल्लीजीवनस्य उन्नत्यै रवीन्द्रनाथस्य भावना अद्य सभ्यतायाः विकसिते समये विशेषोपयोगिनी। जीवनस्य जीविकायाः तथा अर्थनीतेः प्रश्ने सत्यं हि तस्य दर्शनमभावनीयम्। रवीन्द्रनाथस्य मते" केवलं कायक्लेशेन कथञ्चित् किञ्चित् भुक्त्वा परिधाय वा जीवनं न निर्वहणीयम्। यतो हि तद्भवति तस्य मनुष्यस्य कृते अवमानना, वयं कथं श्रेयसं किञ्च सुष्ठु जीवनं प्राप्नुमः इति विषयेऽपि अस्माभिः ध्यानं

देयम्" इति। रवीन्द्रनाथस्य एतादृशीं कृषिभावनाम्, अर्थनीतिभावनां, ग्रामोन्नयनभावनां, समवायभावनाञ्च वयं यावत् शीघ्रम् अनुसरामः तावत् शीघ्रं हतसर्वस्वानां दारिद्र्यपीडितानां मनुष्याणाम् उन्नत्यै सहायकाः भवितुं अर्हामः। अनेन देशोन्नतिः अपि एधिष्यते।

## ॥तस्करकथा॥

अनुवादकः -सौमित्रः आचार्यः, स्नातकोत्तरप्रथमवर्षीयः।

गुप्तिसनीडस्य विश्वम्भरमहोदयः शिबिकामारुह्य गच्छति सप्तग्रामम्। फाल्गुनो मासः। किन्तु अधुनापि बहु शैत्यं वर्तते। केभ्यश्चन दिवसेभ्यः प्राक् प्रायः एकसप्ताहं यावत् वृष्टिः संजाता। विश्वम्भरमहोदयस्य गात्रे एकं पीनकम्बलम्। शिबिकया साकं गच्छति तस्य भृत्यः शम्भुः, हस्ते तस्य दीर्घो दण्डो वर्तते। शिबिकायाश्छदौ औषधस्य पेटिका रज्वा बद्धा। शम्भोः शरीरे अद्भुतं बलमस्ति। एकवारं कुम्भीरारण्ये स भल्लुकेन गृहीतः। सकाशे भुशुण्डिका नासीत्। केवलं दण्डेन तस्य भल्लुकेन साकं संघर्षो जातः। शम्भोः हस्तस्थितदण्डेन भल्लुकस्य मेरुदण्डो भग्नो जातः। तस्य पुनः उत्थानशक्तिर्नागता। पुनः एकवारं शम्भुः विश्वम्भरमहोदयेन साकं स्वर्णगञ्जं गतः। तत्र पद्मानद्यास्तीरे रन्धनं स्यात्। तदा ग्रीष्मकालस्य मध्याह्नः। पद्मायाः पार्श्वे लघुमन्दारवृक्षाणामरण्यम्। चुल्ल्यां बह्निसंयोगः करणीयः। लवित्रेण शम्भुः मन्दारशाखां कर्तयित्वा पोटलिकां कृतवान्। असह्यं रौद्रम्। बहु तृष्णानुभूयते। नद्यां शम्भुः जलं पातुं गतः। अकस्मात् दृष्टमेको गोवत्सो मकरेण गृहीतः। शम्भुः उत्प्लुत्य जले मकरस्य पृष्ठे उपविष्टवान्। लवित्रेण तस्य गले घर्षयन्नासीत्। जलं रुधिरेण रक्तवर्णं जातम्। मकरो यन्त्रणया गोवत्सम् अत्याजत्। शम्भुः संतीर्य तीरम् आगतः।

विश्वम्भरमहोदयः चिकित्सकः। रोगिनं द्रष्टुं गच्छति बहु दूरम्। तत्र इस्टिमारघट्टस्य अध्यक्षः मधुविश्वासः। तस्य कनिष्ठपुत्रः अम्लशूलाख्येन रोगेण अतीव कष्टमनुभवति।

विष्णुपुरस्य पश्चिमपार्श्वस्थं क्षेत्रं प्रकाण्डं वर्तते। तत्र यदा शिबिका आगता तदा सायंकालः समागतः। गोपालः गाः नीत्वा गोष्ठं प्रत्यागच्छति। विश्वम्भरमहोदयः तमाहूय पृष्टवान्, “भोः महोदय, सप्तग्रामः कियद्दूरं वर्तते वक्तुं शक्यते वा?”

गोपालः उक्तवान्, “आम्, तत्तु सप्तक्रोशपरिमितं भवेत्, अद्य मा गच्छतु, पथि

भीष्महट्टस्य क्षेत्रम्, तत्समीपे श्मशानः, तत्र दस्यूनां त्रासोऽस्ति।”

चिकित्सकः अवादीत्, “आर्य, रोगी पीडामनुभवति, मया गन्तव्येव।”

तिल्पनितडागस्य पार्श्वे यदा शिबिका आगता तदा रात्रौ दशवादनम्। बन्धनं शिथिलीभूय शिबिकाया उपरिष्टात् चिकित्सकस्य पेटिका पतिता। क्याष्टरतैलस्य कूपी पतनात् चूर्णा जाता। पेटिका तु पुनः बहुदृढं बद्धा। परन्तु पुनः विपद् वर्तते। तडागममतिहाय क्रोशद्वयम् अतीतम्। अस्मिन् समये मड् मड् इति कृत्वा शिबिकाया दण्डो भग्नो जातः, शिबिका मृत्तिकोपरि पतिता। शिबिका लघुकाष्ठेन निर्मिता; विश्वम्भरमहोदयस्य देहः स्थूलो विद्यते।

अधुना उपायो नास्ति, अत्रैव रात्रिः यापनीयास्ति। चिकित्सकेन तृणोपरि कम्बलम् विस्तारितम्। सकाशे दीपः स्थापितः। शम्भ्वा साकं जल्पनं कुर्वन्नस्ति।

अस्मिन् समये शिबिकावाहकानां मुख्यः बुद्धुः आगत्य अवदत्, “पुरतः केचन आयान्ति, एते दस्यवः इत्यत्र नास्ति सन्देहलेशोऽपि।”

विश्वम्भरमहोदय उक्तवान्, “भयं कुतः, यूयं तु तिष्ठत”। बुद्धुरुक्तवान् “बल्गुः पलायितः, पल्लुकोऽपि न दृश्यते। वक्सिः निकुञ्जे अन्तर्हितः। भयेन विष्णोः हस्तपादाः जडवज्जाताः।”

श्रुत्वा चिकित्सकः भयेन कम्पितः। आह्वयति, “शम्भो!” शम्भुः प्रत्यवोचत्, “आम्”। चिकित्सकः अवादीत्, “इदानीं कः उपायो भवेत्।” शम्भुरवोचत्, “भयेनालम्, अहमस्मि।” चिकित्सकोवदत्, “एते तु पञ्च जनाः।” शम्भुरवोचत्, “अहं तु शम्भुः।” इत्युक्त्वा उत्तिष्ठन् उप्लवनं कृत्वा गर्जित्वा चोक्तवान् “अलमग्रेसरणेन।”

तस्कराः अट्टहासं कुर्वन्तः समीपे आगच्छन्तः सन्ति। तदा शम्भुः शिबिकाया भग्नदण्डं गृहीत्वा एतान् अताडयत्। तस्य एकप्रहारेण त्रयः युगपत्पतिताः। ततः शम्भुः यदा दण्डं भ्रामयन् एतेषामुपरि लम्फनं कृतवान् तदा अवशिष्टौ जनौ धावितवन्तौ। तदा चिकित्सकः आह्वयति, “शम्भो!” शम्भुरवदत्, “आम्।” विश्वम्भरमहोदयः उक्तवान्, “अधुना पेटिकां बहिः निष्काशय।” शम्भु अवदत्,

“किमर्थं, पेटिकया किं भविष्यति।” चिकित्सकः अवोचत्, “अमीषां त्रयाणां चिकित्सा कर्तव्या। पट्टिकया बन्धनं कर्तव्यम्।” रात्रिस्तदा किञ्चिदेवावशिष्टा। विश्वम्भरमहोदयः शम्भुश्च मिलित्वा बन्धनं कृतवन्तौ।

प्रातः संजातम्। भग्नघनखण्डराशीनां मध्यभागात् सूर्यरश्मिरागच्छति। एकैकशः सर्वे वाहकाः समागताः। वल्गुरागतः, पल्लुरागतः, वक्सिवाहकस्य हस्तं गृहीत्वा आगतः विष्णुः, तदापि तस्य हृत् कम्पते।

# ॥रवीन्द्रनाथस्य देशप्रेम॥

तुहिनमण्डलः , स्नातकप्रथमवर्षीयः

ऊनविंशतिशताब्द्याः शेषार्धः। सम्प्रति इस्ट-इण्डिया-कोम्पानि इत्यस्य शासनात् परं साक्षात् ब्रिटिश्-शासनम् आरब्धम्। एतावत् स्वजातीयताबोधेनोद्बुद्धैः भारतीयैः बहवः विद्रोहाः जाताः। तत्फलतया भारतभूमौ ब्रिटिश्-शासनं तीव्रतरं जातम्, स्वातन्त्र्यं तु दूरे आसीत्। विद्यालये कार्यक्षेत्रे मार्गे सर्वत्रैव भारतीयाः ब्रिटिश्-जनैः निन्द्यन्ते अवमान्यन्ते च। अस्मिन्नेव माहेन्द्रक्षणे जातो भारतवर्षस्य अन्यतमः कविः साहित्यिकः दार्शनिकः देशप्रेमिकश्च कविगुरुः रवीन्द्रनाथ-ठाकुरः।

अष्टाषष्ठ्युत्तरद्वादशशततमे बङ्गाब्दे वैशाखमासस्य पञ्चविंशतितमे दिनाङ्के (07/05/1861) कोलकातानगर्याः जोडासाँको इत्याख्ये स्थाने पितुः देवेन्द्रनाथस्य गृहे मातुः सारदादेव्याः क्रोडमलङ्कुर्वन् जनिं लब्धवान् रवीन्द्रनाथः। विद्यालयीयशिक्षां त्यक्त्वा गृहशिक्षकैः तस्य प्राथमिकशिक्षा आरब्धा। आबाल्यात् स आसीत् कविप्रतिभावान्। अष्टवर्षीयः सः कवितां लेखितुमारब्धवान्। सममेव तस्मिन् जातीयताबोधोपि जागरितः। देशप्रेमिकः रविन्द्रनाथः तस्मिन् काले बहूनि पद्यानि गीतानि च अरचयत्। यथा - “यदि तोर डाक शुने केउ ना आसे तवे एकला चलो रे...”, “बांलार माटि बांलार जल...”, “ओ आमार देशेर माटि...” इत्यादीनि तेषु उल्लेखयोग्यानि। एतानि गीतानि भारतवासिनां हृदि जातीयताबोधं जागरितवन्तः। एतेन साक्षात् युद्धक्षेत्रे अनवतर्यापि योद्धृन् उद्बोधितवान् रवीन्द्रनाथः। तदीयलेखन्या तदानीन्तनब्रिटिश्शासनशासितसमाजस्थितिः सुष्ठु चित्रिता काव्यरूपेण। “गोरा”, “घरे बाइरे”, “अचलायतन”, इत्यादीनि तेषु उल्लेखयोग्यानि। एवं ब्रिटिश्शासनस्य दृढं खण्डनं कुर्वता तेन भारतीयस्वातन्त्र्यान्दोलनस्य प्रोत्साहनं कृतम् ।

स्वातन्त्र्येण सममेव जातीयैक्यमपि स ईप्सितवान्। “अवस्था ओ व्यवस्था”-शीर्षकप्रबन्धे तेन तदैक्यप्रस्तावःप्रदत्तः। परन्तु तत्कालीनानां केषाञ्चन राष्ट्रनेतृणां निर्णयेन जातिधर्मानुसारं देशविभागप्रसङ्गः उत्थितः। अतः पञ्चोत्तरोनविंशतिशततमे

ईशवीयाब्दे हिन्दु-ईस्लामजनयोर्मध्ये रक्षाबन्धनोत्सवमारब्धवान्। एतेन जातीयसंहतिः ऐक्यञ्च दृढीभूतम्।

तेन रचितस्य सूक्ष्मसंवेदनयुक्तस्य नवीनस्य उत्कृष्टस्य च गीताञ्जलीकाव्यस्य कृते १९१३ तमेवर्षे नोबेल्-साहित्यप्रशस्तिः प्राप्ता ।

रवीन्द्रनाथः स्वस्य कविप्रतिभया ब्रिटिश्जनैः नाईट् इत्युपाधिना भूषितः। किन्तु ऊनविंशत्युत्तरोनविंशतितमे ईशवीयाब्दे जालियानओयालावाग्-हत्याकाण्डस्य प्रतिवादरूपेण स तदुपाधिं वर्जितवान्। तेन तस्य स्वजातिप्रीतिः ज्ञायते।

देशप्रेमिकस्तस्य कृतिषु बह्व्यः देशात्मककृतयः प्राप्यन्ते। श्रेष्ठा कीर्तिस्तावत् जन-गण-मन इति गीतम्। यद्धि अस्माकं जातीयसङ्गीतरूपेण सर्वत्रैव सश्रद्धं जेगीयते। बहुदेशप्रेमिणां प्राणत्यागेन भारतवर्षम् इदानीं स्वतन्त्रम्। किन्तु स्वातन्त्र्यं भजमानानाम् अस्माकं भारतवर्षस्य स्वतन्त्र्यताप्राप्तये विशिष्टदेशप्रेमिकरवीन्द्रनाथस्य अवदानम् अतुलनीयमिति न कोऽपि सन्देहलेशः।

# ॥तथ्यमञ्जूषा॥

मलय-माइतिः, स्नातकतृतीयवर्षीयः

- जन्म- मई-मासस्य सप्तमे, १८६१ ईशवीयाब्दे।
- पिता- महर्षिः देवेन्द्रनाथः ठाकुरः। माता- सारदा देवी।
- षोडशे वयसि भानुसिंहनाम्ना प्रथमं काव्यप्रकाशनम्।
- १९०१ ईशवीयाब्दे शान्तिनिकेतनप्रतिष्ठापनम्।
- १९१३ ईशवीयाब्दे नवेम्बरमासि यूरोपीयबहिर्भूतेषु प्रथमं नोबेल्-प्रशस्तिप्राप्तिः साहित्यस्य कृते।
- १९१५ ईशवीयाब्दे आविर्भावदिवसे किं-जर्ज-द्वारा Knighthood -प्रशस्तिप्राप्तिः।
- स्वतन्त्रे परिसरे एव शिशूनां सम्यक् प्रतिभाविकाशः स्यात् इत्यस्य उद्गाता।
- १९१८ ईशवीयाब्दे दिसम्बरमासस्य चतुर्विंशतिदिनाङ्के विश्वभारतीप्रतिष्ठापनम्।
- अयं महाकविः त्रयाणां राष्ट्राणां भारतश्रीलंकाबाङ्लादेशानां जातीयसंगीतप्रणेता।
- प्रयाणम्- अगस्त्यमासस्य सप्तमे, १९४१ ईशवीयाब्दे।
- २००४ ईशवीयाब्दे विश्वभारतीप्रतिष्ठानात् विश्वकवेः नोबेल्-प्रशस्तिः चोरिता।